श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीपराङ्कुश यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ श्रीमदादिवण्शठकोपयतीन्द्र महादेशिक मङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमदादिवण्शठकोपयतीन्द्र महादेशिक मङ्गळम् ॥

श्रीश्रीनिवासयतिराण्णारायणमुनीश्वरौ।
वीरराघववेदान्तयतीन्द्रमभिसंश्रये॥

कन्याज्येष्ठावतीर्णाय कारुण्यात् कमलापतेः।
आदिवण्शठकोपाख्ययतीन्द्रायास्तु मङ्गळम्॥ १ ॥

साक्षाच्छठारिर्योगीन्द्रः समाहूय स्वनामतः।
पाञ्चजन्यादिकं यस्मै दत्तवांस्तस्य मङ्गळम्॥ २ ॥

अहोबिले श्रीनृसिंहः प्रेषमन्त्रं स्वयं ददौ।
योगिरूपेण यस्यास्मै शठकोपाय मङ्गळम्॥ ३ ॥

भाष्यकारः पुनर्भूमौ भाष्यप्रवचनादरात्।
यद्रूपेणागतस्तस्मै शठकोपाय मङ्गळम्॥ ४ ॥

रहस्यत्रयसाराख्यराकाचन्द्रस्य वारिधिः।
वेदान्तदेशिकस्सोऽयमेवं तर्क्याय मङ्गळम्॥ ५ ॥

श्रीनृसिंहदयादत्तश्रीमदास्थानवारिधेः।
अकलङ्कः कलानाथो यस्तस्मै नित्यमङ्गळम्॥ ६ ॥

श्रीवैष्णवसमाजस्य श्रीसमाख्यातसंपदः।
कारणं योऽभवत्तस्मै शठकोपाय मङ्गळम्॥ ७ ॥

लक्ष्मीनृसिंहकरुणा लक्ष्मीविहरणोचितः।
य आदिशठकोपाख्यः तस्मै भवतु मङ्गळम्॥ ८ ॥

यन्मङ्गळाशासनेन यच्छन्मङ्गळमन्वहम्।
श्रीनृसिंहस्सञ्चरति तस्मै भवतु मङ्गळम्॥ ९ ॥

यत्कटाक्षेण सर्वेऽपि यत्स्थानागतयोगिनः।
श्री नृसिंहदयापूर्णाः तन्मुनेर्मङ्गळं सदा॥ १० ॥

यच्छिष्याग्र्यो वैदिकानां सार्वभौमत्वमेत्य च।
रत्नाकरादीन् कृतवांस्तन्मुनेर्मङ्गळं सदा॥ ११ ॥

नारायणमुनीद्राख्यो यच्छात्रो यत्कृपावशात्।
षष्टिप्रबन्धनिर्माता खल्वस्मै मङ्गळं सदा॥ १२ ॥

‡श्रीशठारियतीन्द्रादि योगिहृत्पद्मभानवे।
सर्वत्र परिपूर्णाय अहोबिलेशाय मङ्गळम्॥ १३ ॥

‡पराङ्कुशमुनीन्द्रेण भक्त्यास्मै मङ्गळं कृतम्।
यः पठेत् स भवेद्धन्यः श्रीनृसिंहकृपावशात्॥ १४ ॥

श्रीरामानुजसिद्धान्तनिर्धारण धुरन्धरः।
आदिवण्शठकोपख्ययतीन्द्रो जयतात् भुवि॥ १५ ॥

॥ इति श्रीमदादिवण्शठकोपयतीन्द्र महादेशिक मङ्गळं समाप्तम् ॥